वा, नाद्यः अतीन्द्रियत्वप्रसङ्गात्, न द्वितीयः विशेष्यविशेषणभावेन द्वयोरनाकलनरूपत्वात्। किञ्च सुखदुःखयोरस्वसंवेद्यत्वात् ज्ञानस्यावश्यसंवेद्यत्वेऽनवस्थाप्रसङ्गात्। लैङ्गिकमिति लिङ्गमेव वैषयिकवत्। दीधितिकृतस्तु तयोर्ज्ञानसुखयोर्निष्पत्तिः प्रत्यक्षलैङ्गिकाभ्यां प्रत्यक्षलैङ्गिकज्ञानव्याख्यानाभ्यां व्याख्याता, प्रत्यक्षं ज्ञानमिन्द्रियजम्, लैङ्गिकन्तु लिङ्गजम्, सुखादिकन्तु नैतादृशमिति व्याचक्रुः" उप० वृ०। "अभूदित्यपि" सू० "लैङ्गिकज्ञानाद् सुखादेः प्रकारभेदाधीनं भेदमाह इति शब्दः प्रकारे, अपिशब्दो भविष्यतीत्याकारान्तरसमुच्चये, तथाच पर्वते वह्निरभूद्भविष्यति वेति लैङ्गिके ज्ञानेऽतीतादिः प्रकारो दृश्यते न चैवं प्रकारं सुखं दुःखं वा उत्पद्यमानमुपलब्धम्" उप० वृ०। "सति च कार्यदर्शनात्" सू० "चशब्दः भेदकान्तरं समुच्चिनोति। सति इन्द्रियार्थसन्निकर्षे सति च व्याप्तिपक्षधर्म्मतादिप्रतिसन्धाने कार्य्यस्य सुखस्य दुःखस्य वाऽदर्शनात् न प्रत्यक्षमात्रं सुखं दुःखं वा न लैङ्गिकमात्रं वा, तदयमर्थः ज्ञानसामान्यं तावत् सुखदुःखे न भवत इत्युक्तं ज्ञानविशेषः प्रत्यक्षज्ञानं वा भवेदनुमितिरूपं वा इन्द्रियार्थसन्निकर्षे स्रक्चन्दनादिप्रत्यक्षे सुखत्वानुभवाभावात्, न द्वितीयः चन्दनाद्यनुमितौ वह्न्याद्यनुमितौ वा सुखत्वदुःखत्वान्यतराननुभवात्। एवं प्रत्यक्षविशेषेऽनुमितिविशेषे वा सुखदुःखयोरननुभवान्न तद्विशेषोऽपीति" उप० वृ०। "एकार्थसमवायिकारणान्तरेषु दृष्टत्वात्" सू०। "भेदकान्तरमाह सुखदुःखयोरिति शेषः, सुखं प्रति एकार्थसमवेतानि असाधारणकारणानि, धर्म्मः, सुखे रागः, सुखकारणेच्छा, तदुपादानयत्नः, स्रक्चन्दनादिज्ञानम्। दुःखं प्रति तु अधर्म्मः, अनिष्टकण्टकादिज्ञानम्, एषु एकार्थसमवायिषु कारणेषु दृष्टत्वादित्यर्थः, ज्ञानन्तु निर्विकल्पकमेकार्थसमवेतमसाधारणकारणं नापेक्षत एव, सविकल्पकन्त्वपेक्षते विशेषणज्ञानं तच्च कारणान्तरं स्वविजातीयं कारणं न भवति, मनःसंयोगस्तु साधारणत्वादविवक्षितः। यद्यपि स्मृतिः संस्कारमसाधारणमपेक्षते तथापि तद्भेदः स्फुटसिद्ध एवेत्यनुभवमादाय भेदाभिधानात्। लैङ्गिके यद्यपि व्याप्तिस्मृतिपक्षधर्म्मतादिज्ञानापेक्षा तथाप्यन्तरशब्देनैव तद्व्युदासः। तदयं प्रमाणप्रयोगः सुखदुःखे अनुभवभिन्ने स्वसमानाधिकरणसजातीयासाधारणकारणजन्यत्वात् स्मृतिवदाद्यशब्दवत्" उप० वृ०।

सांख्यास्तु तस्य रजःकार्यत्वम् चित्तस्य विषयाणाञ्च धर्मत्वं तत्त्रैविध्यञ्चोररीचक्रुः। तथा हि "दुःखत्रयाभिघातादित्यादि" सा० का० तत्त्वकौमुद्यामुक्तं यथा "दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधम् आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च तत्राध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तं, मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च तत्राधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहावेशनिबन्धनम्। तदेतत् प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रिकेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तः। यद्यपि न सन्निरुध्यते दुःखं तथापि तदभिभवः शक्यः कर्त्तुमित्युपरिष्टान्निवेदयिष्यते"

"भोग्ये हि सुखदुःखे अनुकूलप्रतिकूलवेदनीये प्रत्यात्ममनुभूयेते तेनानयोरनुकूलनीयेन प्रतिकूलनीयेन च केनचिदप्यन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीया वा बुद्ध्यादयस्तेषां सुखदुःखाद्यात्मकत्वेन स्वात्मनि वृत्तिविरोधात्। तस्माद्योऽसुखाद्यात्मा सोऽनुकूलनीयः प्रतिकूलनीयो वा स चात्मेति" सा०प्र०भा०।

सर्वेषां त्रिगुणात्मत्वात् विषयस्यापि सुखदुःखात्मकत्वं त०कौ० व्यवस्थापितं यथा

"अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः? स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री सपत्नीर्दुःखाकरोति तत्कस्य हेतोः? ताः प्रति तस्या दुःखरूपसमुद्भवात्। एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः? तत् प्रति तस्या मोहरूपसमुद्भवात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात्। तस्मात् सुखदुःखमोहैरिव